# Brahmadibhih Kritam Surya Stotram 12

# ब्रह्मादिभिः कृतं सूर्यस्तोत्रम् १२

## Document Information

Text title : Brahmadibhih Kritam Surya Stotram 12

File name : brahmAdibhiHkRRitaMsUryastotram12.itx

Category : navagraha, bhaviShyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : bhaviShyapurANa | brAhmaparva | adhyAya 122/3-8||

Latest update : October 7, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# ब्रह्मादिभिः कृतं सूर्यस्तोत्रम् १२

सुमन्तुरुवाच ।
शृणुष्वैकमना राजन्यथा देवो दिवस्पतिः ।
ब्रह्मादिभिः स्तुतो देवैर्ऋषिभिश्च पुराऽनघ ॥ २॥

ब्रह्मादय ऊचुः ।
प्रयत्नतः प्रणतहितानुकम्पिने स्वरूपतो लोकविभाविने नमः ।
दिवस्पते कमलकुलावबोधिने नमस्तमः पटलपटावपायिने ॥ ३॥

पावनातिशयपुण्यकर्मणे नैककामविभवप्रदायिने ।
भासुरामलमयूखमालिने सर्वलोकहितकारिणे नमः ॥ ४॥

अजाय लोकत्रयभावनाय भूतात्मने गोपतये प्रियाय ।
नमो महाकारुणिकोत्तमाय सूर्याय लोकत्रयभावनाय ॥ ५॥

विवस्वते ज्ञानकृतान्तरात्मने जगत्प्रतिष्ठाय जगद्धितैषिणे ।
स्वयम्भुवे लोकसमस्तचक्षुषे सुरोत्तमायामिततेजसे नमः ॥ ६॥

निजोदयाय सुरगणमौलिमणे जगतस्त्वं महितैस्त्वमुरुमयूखसहस्रतपाः ।
जगति विभो वतमसतुद वनतिमिरासवपावन मदाद्भवति
विलोहितविग्रहतातिमिरविनाशिनमुग्रं सुतरां त्रिभुवनभाप्रकरैः ॥ ७॥

रथामारुह्य समामयं भ्रमसि सदा जगतो हितदः ॥ ८॥

इत्येवं संस्तुतो देवो भास्करो वेधसा पुरा ।
दैवतैश्च महाबाहो शिवविष्ण्वादिभिर्नृप ॥ ९॥

इति श्रीभविष्यपुराणे ब्राह्मे पर्वणि द्वाविंशत्यधिकशततमाध्यायान्तर्गतं
ब्रह्मादिभिः कृतं आदित्यस्तोत्रं समाप्तम् ।

भविष्यपुराण । ब्राह्मपर्व । अध्याय १२२/३-८॥

bhaviShyapurANa . brAhmaparva . adhyAya 122/3-8..

Proofread by PSA Easwaran

*Brahmadibhih Kritam Surya Stotram 12*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*